# संस्कृतम्
# ( 209 )
# शिक्षक अंकितमूल्यांकन-पत्रम्

पूर्णांका: - 20

*निर्देशा : (i) सर्वे प्रश्ना: अनिवार्या:। प्रश्नानुसारेण अङ्का: समक्षे निर्देशिता:।*

*(ii) उत्तरपुस्तिकाया: प्रथमपृष्ठे स्वनाम, अनुक्रमाङ्कसंख्या, शिक्षणकेन्द्रस्य नाम इति सर्वं लेखनीयम्।*

1. कस्यचिदेकस्य प्रश्नस्य उत्तरं 40-60 शब्देषु लिखत- 2

(क) "सुभाषितानि" इति पाठे प्रदत्तानि पञ्चजीवनमूल्यानि आधृत्य पञ्चवाक्यानि लिखत। यथा- वृत्तं यत्नेन संरक्षेद् वित्तमेति च याति च। (पाठ-1, सुभाषितानि)

(ख) बोपदेवस्य क: गुण: कथञ्च भवत: जीवनं प्रेरयति? (पाठ-2, प्रेरणा)

2. कस्यचिदेकस्य प्रश्नस्य उत्तरं 40-60 शब्देषु लिखत- 2

(क) "त्याज्यं न धैर्यम्" इति पाठम् आधृत्य "षड्विधं प्रीतिलक्षणम्" लेख्यताम्। (पाठ-3, त्याज्यं न धैर्यम्)

(ख) "कस्मात् किं शिक्षेत?" इति पाठे सिंह-गर्दभ-वक-कुक्कुरादिम्य: कथं शिक्षा गृहीतव्या इति शिक्षितम्। तदनुसारमेवधेनु-मूषक-नकुल-नदीत्यादिभ्य: का: शिक्षा प्राप्यन्ते इति संक्षेपेण लिखत। (पाठ-4, कस्मात् किं शिक्षेत?)

3. कस्यचिदेकस्य उत्तरं 40-60 शब्देषु लिखत- 2

(क) शरीरे विविधानि इन्द्रियाणि स्वस्वकार्यं कुर्वन्ति। "प्राणस्य श्रेष्ठत्वम्" इति पाठं पठित्वा तेषां कार्याणि लिखत। (पाठ-5, प्राणस्य श्रेष्ठत्वम्)

(ख) "यद्भविष्यो विनश्यति" इति पाठे क्त्वा-ल्यप् प्रत्ययान्तानां पदानां चयनं कुरूत वाक्येषु प्रयोगं च प्रदर्शयत। (पाठ-6, यद्भविष्यो विनश्यति)

4. कस्यचिदेकस्य प्रश्नस्य उत्तरं 100-150 शब्देषु लिखत- 4

(क) "त्याज्यं न धैर्यम्" इति पाठानुसारं धैर्यस्य विशेषरूपेण कदा महत्वं जायते? धैर्यमधिकृत्य जीवने अनुभूतां कामपि अन्यां घटनां लिखत। (पाठ-3, त्याज्यं न धैर्यम्)

(ख) "प्राणस्य श्रेष्ठत्वम्" इति पाठे भवद्भि: पठितं यत् शरीरे प्राणा: एव श्रेष्ठा:। स्वमतानुसारं स्पष्टीकुरुत। (पाठ-5, प्राणस्य श्रेष्ठत्वम्)

5. कस्यचिदेकस्य प्रश्नस्य उत्तरं 100-150 शब्देषु लिखत- 4

(क) "संसारे क्रोऽपि जीव: तुच्छ: नास्ति। सर्वेषु पशुषु पक्षिषु वृक्षेषु च गुणा: सन्ति।" "कस्मात् किं शिक्षेत?" पाठानुसारं वर्णयत्। (पाठ-4, कस्यात् किं शिक्षेत)

(ख) "यद्भविष्यो विनश्यति" इति पाठे भवद्भिः पठितं यत् जीवने साफल्यं भाग्यापेक्षया पुरूषार्थेणैव प्राप्तुं शक्यते। अतः एतादृशम् एकं श्लोकं लिखत यस्मिन् पुरूषार्थ भाग्ययोः पुरूषार्थस्य वैशिष्टयं प्रदर्शितं स्याद इति। (पाठ-6, यद्भविष्यो विनश्यति)

6. अधोलिखितेषु कमपि एकं विषयमधिकृत्य परियोजना विवरणं लिखित- 6

(क) समाचारपत्रेभ्यः शैक्षणिक-सामाजिक-वैज्ञानिक-दृष्टया महत्त्वपूर्णा पञ्चचित्राणां संकलनं कृत्वा प्रत्येकं पञ्चवाक्येषु संस्कृतेन वर्णनं कुरूत।

(ख) केषाञ्चित पञ्चकार्यालयानां कार्यशैलीं दृष्ट्वा तेषु प्रत्येकस्य कार्यालयस्य वर्णनं कुरूत यथा- पत्रालयः, पुस्तकालयः, बैंककार्यालयः, चिकित्सालयः वस्त्रनिर्माणशालाकार्यालयः, जलविभागकार्यालयः इत्यादयः।